# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-२ (SEM-4) | **प्रश्नपत्रम्** - २ | **गुणाः** - ७० |
| **विषयः** - साहित्यम् | **कोड**- **CC- 5410** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - ३०/०३/२०१९ | **सन्दर्भग्रन्थः**- काव्यालङ्कारसूत्रवृत्तिः अधिकरणानि ३,४,५ | |

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ अधो लिखिताभ्याम् एकं सूत्रं ससन्दर्भं स्पष्टयत ।** **०५**

१. तदतिशयहेतवस्त्वलङ्काराः ।

२. अर्थो व्यक्तः सूक्ष्मश्च ।

**प्रश्नः २ आचार्यवामनस्य गुणविचारं विवेचयत ।** **१०**

अथवा

**शब्दगुणान् सविस्तरं वर्णयत ।**

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ अधो लिखिताभ्याम् एकं सूत्रं ससन्दर्भं स्पष्टयत ।** **०५**

१. पिण्डाक्षरभेदे स्वरूपलोपश्चूर्णम् ।

२. उपमानोपमेयस्य गुणलेशतः साम्यमुपमा ।

**प्रश्नः ४ यमकालङ्कारं सविस्तरं विवेचयत ।** **१०**

अथवा

**रूपकालङ्कारम् उदाहरणेन सह स्पष्टयत ।**

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ अधो लिखिताभ्याम् एकं सूत्रं ससन्दर्भं स्पष्टयत ।** **०५**

१. नैकं पदं द्विः प्रयोज्यं प्रायेण ।

२. रुद्रावित्येकशेषोऽन्वेष्यः ।

**प्रश्नः ६ अधो लिखितेभ्यः द्वयोः सूत्रयोः टिप्पणी कार्या ।** **१०**

१. ते मे शब्दौ निपातेषु ।

२. बिम्बाऽधर इति वृत्तौ मध्यमपदलोपिन्याम् ।

३. सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ ।

४. स्तनादीनां द्वित्वाविष्टा जातिः प्रायेण ।

॥ **चतुर्थान्वितिः** ॥ (Unit-4)

**प्रश्नः ७ निम्नलिखिताभ्याम् एकं सूत्रं ससन्दर्भं स्पष्टयत ।** **०५**

१. शोभेति निपातनात् ।

२. कञ्चुकीया इति क्यचि ।

**प्रश्नः ८ अधो लिखितेभ्यः द्वयोः सूत्रयोः टिप्पणी कार्या ।** **१०**

१. शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः ।

२. मनुष्यजातेर्विवक्षाविवक्षे ।

३. तिलकादयोऽजिरादिषु

४. नाङ्गुलिसङ्ग इति मूर्धन्यविधेः

**प्रश्नः ९ निम्नलिखितेभ्यः दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१. आचार्यवामनस्य मतानुसारं के के गुणाः सन्ति?

२. कतिविधम् ओजः?

३. 'उदारता' इति अर्थगुणस्य लक्षणं लिखत ।

४. माधुर्यशब्दगुणस्य उदाहरणं लिखत ।

५. अर्थः कतिविधः?

६. को नाम काव्यपाकः?

७. अनन्वयालङ्कारस्य उदाहरणं लिखत ।

८. अर्थान्तरन्यासालङ्कारस्य लक्षणं लिखत ।

९. काव्यालङ्कारसूत्रवृत्त्याः पञ्चमाधिकरणस्य नाम किम्?

१०. काव्यालङ्कारसूत्रवृत्त्याः पञ्चमाधिकरणस्य द्वितीये अध्याये कति सूत्राणि सन्ति?

११. अत्युच्चपदाध्यासः पतनायेत्यर्थशालिनां शंसत् ।
आपाण्डु पतति पत्रं तयोरिदं बन्धनग्रन्थेः ॥ इत्यत्र कः अलङ्कारः?

१२. पूर्णोपमा कदा भवति?

१३. कीदृशः वर्णानुप्रासः श्रेयान्?

१४. गुणसन्दर्भे घटनायाः अर्थः कः?

१५. समासोक्त्यलङ्कारस्य लक्षणं लिखत ।

०००